Shiva rahasya - Pt 10 - Uttarardh
शिव रहस्य - दशमांश - उत्तरार्द्ध
Sanskrit
Paper
Handwritten - Folio - 16
132 years old
14.2" x 7.3"
Incomplete.

शिव रहस्य - दशमांश - उत्तरार्द्ध
प्रारम्भ

ई०२०३०

शिवरहस्य अ०१

१

श्रीगणेशायनमः अथशिवरहस्यदशमांशउत्तरार्द्धप्रारंभः इंदुखंडशिरसोवरात्मजंवक्रतुंडमगजाननूभवं नोनुमःप्रणतदुःखखंडनंविघ्नपं
स्वरदखंडसत्करं १ मुनिरुवाच नमस्तेतारकारातेपुराणतिकथारते हरतेदृजिनौघानांस्मर्तेशिवपादयोः २ शिवधर्मोमहासारःसर्वधर्मो
त्तमोत्तमः शिवप्रसादजनकःसर्वेषामेवदेहिनां ३ वर्णाश्रमायासधर्मःसुकरःसर्वदाकथं किंतेनाचरितेनेशःप्रसीदतिमहेश्वरः ४ क्षिप्रंप्र
सादजनकोदेवदेवस्यशूलिनः तस्यस्वरूपमधुनावदसेनापतेधुना ५ शिवद्रोहःकथंप्रोक्तःयःप्रायश्चित्तवर्जितः तस्यस्वरूपंवदमेश्रोतुमुत्कं
ठतेमनः ६ कोवास्यप्रश्नभारस्यवक्तात्वादृगृतेनघ पावयास्मान्कथासारैर्गणान्देवान्मुनीनपि ७ सूतउवाच इत्थंस्कंदस्तदापृष्टोजैगीषव्येनस
तमाः उवाचनत्वादेवेशंवीक्ष्यदेवान्मुनीन्गणान् ८ श्रीस्कंदउवाच स्मरणात्तिप्रसादाययक्षिप्रंधर्मोयमुत्तमः शिवधर्मोडुपःश्रीमानुत्तारकउ
त्तारकउदाहृतः संसारार्णवमग्नानांपापिनांसुकृतामपि कैलासशिखरेगौर्यापृष्टोमहेश्वरः १० शिवधर्ममहासारंअल्पायासंमहत्फलं
अनिष्कृत्तिमहत्पापंशिवद्रोहंतथामुने सेतिहासंवदद्भ्यौर्मयात्छ्रुतमोजसा तच्छृणुष्वविशेषेणसहैभिःसावधानतः १२ रत्नप्रासादमध्य
स्थंकैलासेवामनोहरं प्रांजलिर्विनयोपेताउवाचपरमेश्वरं १३ सुप्रसन्नंमुखांभोजंरत्नाभरणभूषितं अनेकचंद्रसूर्याग्निभासाभासितवि
ग्रहं १४ त्रिपुंड्रविलसत्फालंभस्मपांडुरशोभितं सुधाकरधरंशंभुंगंगाधरमुमासखं १५ नंदिभृंगिमहाकालचंडतंडुनिषेवितं षड्वक्रेण
भवक्त्रेणपार्श्वतःपरिसेवितं उवाचदेवीसानंदंविनयोदारसद्वचः श्रीदेव्युवाच भगवन्भवभूतेशव्योमकेशसदाशिव वृषध्वजविरूपा
क्षकलधौतगिरिप्रियः १७ त्रियंबकजगन्मूर्तेसच्चिदानंदविग्रह कालकालपुरारातेमन्मथांधकसूदन १८ नीलकंठमहादेवसांवसर्व
जगत्पते विश्वसर्गस्थितिलयप्रकाशकरलोचन १९ गंगाधरविरूपाक्षदक्षदीक्षापहारक प्रसीददेवसर्वज्ञविज्ञप्तिःकाचिदस्तिमे २०
तांतूर्णंकुरुदेवेशश्रोत्रकर्णरसायनं भवार्णवनिमग्नानांप्रजानामविवेकिनां २१ क्षिप्रप्रसादजननमल्पायासंमहत्फलं शिवधर्मम
हापुण्यंसर्वधर्मोत्तमोत्तमं २२ शिवद्रुहांपापभोगंकथयस्वामेश्वर शिवधर्मप्रकारःकःशिवद्रोहश्चकोभवेत् २३ कृत्वातेभक्तिमंतस्तेशिव
धर्ममहाफलं संप्राप्तस्तवसान्निध्यंविष्णुब्रह्मादिदुर्लभं २४ दक्षिणोत्तरकैलासवासदंपरमेश्वर भक्तानांतारतम्येनब्रह्मक्षत्रविशांप्रभो शिवः
२५ संकराणांचशूद्राणांतिरश्चामपिभोगदं देवगंधर्वयक्षाणांमुनीनांचगणत्वदं २६ सारूप्यंचैवसामीप्यंसायुज्यंचसलोकतां स्वभ १

क्तितारतस्मिन्नभक्तानांतवसिद्धिदं २७ शिवधर्मंमहापुण्यंसेतिहासंवरप्रभो यच्छ्रुत्वानिगमैर्गोप्यंस्मृतिभिर्नोदितंक्वचित् २८ स्मर्ताः
स्वाधिकारेणप्रवदंत्यल्पसिद्धिदं वर्णाश्रमायासधर्मंईषद्धेतुगुणपापदं २९ कृतेप्यल्पजपुण्यंचमुनयोयान्नैवदंत्सपितद्धर्माचरणेनैवविश्रा
ताजनताभुवि ३० कथंलब्धज्ञतंशंभोधर्मंजानंतिपामराः येनचीर्णेनमुक्ताःस्युःदेवतिर्यङ्नरागणाः ३१ शिवद्रुहापापभोगोनिष्कृतिर्वामु
नीश्वरैः शिवधर्मेशिवद्रोहस्वरूपंतैर्नवैश्रुतं ३२ श्रुतिस्मृतिपुराणेषुनवैदृष्टानचश्रुतः तेश्वषोडशदानानांगोभूम्यन्नप्रदायिनां ३३ मखा
दिकर्मकर्तृणांस्वर्गेभोगंवदंतिते महापापादिमुख्यानांक्षुद्राणांमहतामपि ३४ प्रोक्तस्तेनिष्कृतिंशास्त्रेमुनयःस्मृतिपारगाःशिवधर्मेशिवद्रोह
स्वरूपंतैर्नहिश्रुतं ३५ तस्मादेतत्फलंशंभोशिवद्रोहस्यनिष्कृतिःतैर्नोक्तादेववदेवेशत्वमेववदमेधुना ३६ देव्युवाच हेकृत्तिवासकलधौतन
गाग्रवासचंद्रावतंसमुनिमानसराजहंस महत्कपद्मसुविकासनसुख्यहंसस्कंदेभवक्त्रपरिलोकनमंदहास ३७ इतिश्रीशिवरहस्येईशानाख्ये
दशमांशेउत्तरार्द्धेप्रथमोध्यायः १ श्रीईश्वरउवाच शृणुशैलसुतेवालेविशालेविमलोज्वले तिलकांकितसत्फालेकर्णालंविमहोत्पले १
तवोदारवचोमाध्वीसाध्वीसर्वानुकंपिनी संसाराब्धितरेःप्रणपआनरस्तारकोनृणां २ सर्वेधर्माःश्रुतिप्रोक्तायाजनाध्यायनेफलाः स्वस्वक
वर्णधर्मास्तैपोरणव्रतकीर्तनाः ३ सर्वभोगप्रदाःसर्वैश्वविदुर्विवेकसाधनाः फलांतपातदाधर्माइष्टापूर्तादयोंविके ४ इष्टतुष्टाश्चमुनयोपूर्ता
गर्तेगतिप्रदाः देवभोगप्रदाएतेपश्चधर्माःस्मृताःशिवे ५ पशवोदेवताःसर्वातेषांपतिरहंशिवः सस्वधर्मएवदेविअल्पायासामहत्फलः
६ पतिधर्मोममप्रोक्तोशिवधर्मोयमेवहि भक्तानांअधिकारोत्रशिवधर्मेसनातने ७ पुरुषार्थप्रदोप्यत्रक्षिप्रंमत्प्रीतिदायकः इष्टपूर्ता
त्मकाकेचिज्जपाःप्रोक्ताःकृत्वास्तथा ८ अतिरुद्रमहारुद्रशिवहोमाग्निकार्यतः हावनाःशिवधर्मेत्रकीर्तिताःपरमेश्वरि ९ मन्मूर्ति
ध्यानतादेविशिवधर्माहिमानसाः कायिकाःशिवधर्माहिशिवलिंगेशिवार्चनं १० विल्वपत्रार्जनंहस्तेःपादाभ्यांचप्रदक्षिणाः अंगेन
लुंठनंशंभोःप्रणामोपिचभक्तितः ११ स्वांगेभस्मत्रिपुंड्रादिधारणंमनुसप्तभिः रुद्राक्षधारणंस्वांगेकायिकाःशिवधर्मजाः १२ शिवो
त्सवालोकनार्थंगमनंचनिवासिता वाचाधर्मःस्मृतोह्येषरुद्रपंचाक्षरीजपः १३ शिवनाम्नांजपश्चेतिस्तोत्रंशंभोस्तुवाचिकः शिव
धर्मोत्रकथितोवाचिकोयंमहेश्वरि १४ नेत्राभ्यांलिंगवीक्षाचशिवमूर्तेर्निरीक्षणं शिवोत्सवदिदृक्षाचचाक्षुषोधर्मउच्यते १५ श्राव

योयंमहाधर्मःशिवशब्दश्रवस्तथाशिवेशिवपुराणानांश्रवणंलेखनंविदुः १८ मार्जनपेषणंपुष्पाहरणंतोयपूरणंगोपुराट्टालबंधनं १९ आ
लयेकूपखननंशिवातीर्थानुबंधनंशिवलिंगोद्धृतिःप्रोक्ताअस्तुबंधवितानतः २० मृद्दार्विष्टकपाषाणैःशिवागारानुबंधनं चातुपात्रोपकरणं
शिवागारेप्रदापनं २१ वृषवाहादिकरणंपुष्पस्यंदनकल्पनं भेरीमृद्दलशंखानांतौर्यत्रिकनिवेदनं २२ नाट्यांगनाप्रदानंचवीणादुंदुभिदा
पनं वेदपारायणस्यार्थेब्राह्मणानांचरक्षणं २३ पूजार्थेदेवदेवस्यपद्मोत्पलवनार्पणं बिल्वानांरोपणंदेविरंभाम्रामलकादिकं २४ नालिकेर
मधूकानांजंवीरवनरोपणं पुंड्रेक्षुयवगोधूमशालिभूमिप्रदापनं २५ गजाश्वोष्ट्रखराजाविगोवृषादिप्रदापनं धान्यागारादिकरणंशिवागा
रेमहेश्वरि २६ तद्रक्षणंवीक्षणंचतद्वृद्धिपरिकल्पनं दासीदासप्रदानंचशिवक्षेत्रेतुशैलजे २७ शिवार्चकानांभरणंधान्याच्छादनगोधनैः
भूषणानांप्रदानंचवस्त्राणांदापनंशिवे २८ छत्रध्वजपताकाश्चचामरादर्शदापनंदीपमालाप्रदानंचतैलैरपिचगोघृतैः २९ पुष्पमं
टपनिर्माणंपर्वकालेषुशांकरि पंचामृतैःपंचगव्यैःलिंगवेरादिसेचनं ३० तथाफलरसैःपुष्पैःनारिकेराम्रपानसैः जंवीरगंधकर्पूरइक्षु
रंभारसार्पणं ३१ त्रिकालेषुतथालिंगेप्रदोषेपर्वणोर्द्वयोः विषुवायनयोवापिसंक्रांतिषुचपातयोः ३२ षडशीतिमुखेवापिग्रहणेसोमसूर्य
योः महाभिषेककरणैःअभ्यंगकरणैःशिवे ३३ यक्षकर्दमलेपैश्चदीपैःकर्पूरखंडजैः ग्रीष्मकालेगलंतीनांप्रदानंशिवमस्तके ३४ स्वर्णरौप्य
घटैःपुण्यैर्ताम्रपैत्तलकांस्यजैः मृद्भवैर्वामहादेविशीतलांबुप्रपूरितैः पाटलोशीरकर्पूरकरवीरादिवासितैः गंधानुलेपनंलिंगेशिवागारा
दिलेपनं ३६ शिववेश्मसुचग्रीष्मेशीतलांबुप्रसेचनं साम्राणिगुग्गुलूद्दामधूपसौरभ्यकल्पनं ३७ वीजनंतालवृंतैश्चमायूरव्यजनैःशिवे
तत्रपानकदानैश्चभक्ष्यभोज्यनिवेदनैः ३८ दध्यन्नविनिवेद्यैश्चतांबूलविनिवेदनैः शतसाहस्रधाराणांकलशस्तपनैःशिवे ३९ सव्य॰
दक्षिणेशंखानांगोशृंगासेचनैरपि कृसरान्नप्रदानंचशिवलिंगनिवेदनैः ४० नवरत्नाभिषेकैश्चनवधान्यासनार्पणैः सौवर्णरत्नबिल्वानां
पुष्पपद्मार्पणैस्तथा ४१ उत्पलासितमालानांप्रदानैश्चापिपार्वति सहस्रबिल्वपूजाभिर्लक्षकोटिदलार्चनैः ४२ तत्तत्कालोद्भवसुमल
क्षाणामर्चनैःशिवे श्रीईश्वरउवाच एवंतेशिवधर्मसारमखिलंप्रोक्तंशिवेनूनमप्यद्योक्तंचसुगोप्यमप्यतितरांमत्प्रेमहृद्भक्तिभाक् 
जानंन्नेवकरोतिसत्फलमुमेभुंक्तेसकैलासगोमत्पार्श्वेगणपुंगवश्चसभवेद्योदेवधर्मंचरेत् ४३ इतिश्रीशिवरहस्येईशानाख्येदशमोध्यायः 

त्तरार्धेशिवगौरीसंवादेशिवधर्मकथनंनामद्वितीयोध्यायः २ श्रीदेव्युवाच देवदेवारविंदाक्षपूजितांघ्रिसरोरुह मूलमध्यांतरहितसना
तनजगत्पते १ शिवधर्मस्वरूपंमेत्वयोक्तंपरमेश्वर शिवद्रोहःकिंप्रकारोविस्तराद्वदशंकर २ निस्ताररहितःसोपिश्रोतुंकौतूहलंमम
श्रीशंकरउवाच पार्वत्यैवंप्रष्टएएष्टःकैलासेपरमेश्वरः तामुवाचप्रसन्नात्माजैगीषव्यंश्रृणुष्वमे ३ शिवद्रुहांस्मरणतोकंपतेममनोमुने तथा
पिश्रृणुवक्ष्यामिशिवेनोक्तंश्रुतंमया ४ मुनेत्वंगणपैःसार्धंदेवैर्मुनिभिरेवच ईश्वरउवाच शिवेत्वंश्रृणुकल्याणिशिवद्रोहःसुनिष्ठुरः यच्छ्रुत्वानम
नोभूयाच्छिवद्रोहेमहेश्वरि ५ विभूत्युद्धूलनत्यागःत्रिपुंड्राधारणंशिवे शिवद्रोहःसविज्ञेयःप्रायश्चित्तविवर्जितः ६ रुद्राक्षधारणत्यागःसर्वांगे
षुमहेश्वरि शिवद्रोहःस० ७ पंचाक्षरजपत्यागःप्रसंगादपिशंकरि शिवद्रो० ८ रुद्राध्यायजपत्यागःसर्वदादेविपूजने शिवद्रोहःस० ९ शिवलिंगा
र्चनत्यागोनित्यमेकाहमेववा शिवद्रो० १० प्रदोषपूजनत्यागःसोमवारेष्टमीषुच शिवद्रो० ११ प्रदोषसोमभूतासुअष्टमीषुदिवाभुजा शिवद्रोहःस० १२
विल्वपत्रार्जनत्यागोशिवलिंगार्चनायच शिवद्रो० १३ शिवध्यानपरित्यागोहृदयेपरमेश्वरि शिव० १४ मृत्तिकालेपिनःफालेतप्तचक्रांगकाःसदा॥
शिवद्रो० १५ भूतिरुद्राक्षहीनंचमहेशस्यैवपूजनं शिव० १६ शिवलिंगादिसहितंमन्यदेवार्चनंशिवे शिवद्रो० १७ भूतित्रिपुंड्रफालेयोदृष्ट्वामूढो
ननंदति शिव० १८ रुद्राक्षधारिणंदृष्ट्वायोमूढोनाभिनंदति शिव० १९ पंचाक्षरजपासक्तंदृष्ट्वायोनाभिनंदति शिव० २० रुद्राध्यायजपासक्तंदृ०
शिव० २१ अनालोकनमीशस्यअनभ्यर्च्यान्नभोजनात् शिव० २२ अनिवेद्यान्नभोक्तारःजलंतांबूलमेववा शि० २३ शिवनामपरित्यागोविष्णुनाम्नांच
कीर्तनं शिवद्रोहःसविज्ञेयःप्रायश्चित्तविवर्जितः २४ शिवंयोमनुतेमूढोविष्णुब्रह्मसमंशिवे शि० २५ शिवरात्र्यन्नभोक्तारःशिवशैवव्रतेषुच शिव० २६
शिवोत्सवशिवक्षेत्रेगमनालोकनोज्झितिः शि० २७ शिवालयंध्वंसनंचशिवतीर्थस्यनाशनं शिव० २८ शिवारामच्छेदनंचशिवकूपप्रपूरणं शिवद्रो० २९
स्नानीयहरणंशंभोर्गंधतैलादिहारिणं शिव० ३० कदलीनारिकेलाम्ररंभाजंबीरहारणं शिवद्रो० ३१ शिवपूजोपकर्तॄणाहरणंपरमेश्वरि शिव० ३२
शिवालयेशिवारामेमलमूत्रोज्झितिस्तथा शिव ३३ विनाशकरणंशंभोरुत्सवस्यमहेश्वरि शिव० ३४ शिवक्षेत्रसमत्वेनविष्णुक्षेत्रानुचिंतनंशिव० ३५
बिल्वानांछेदनंदेविपुष्पारामविनाशनं शिव० ३६ शिवेशिवपुराणानांनिंदनाश्रवणंतथा शिव० ३७ शिवनाम्नाविनिंदाचअन्यनामप्रशंसनं शिव० ३८
शिवभक्ताविनिंदाचअन्यभक्तार्चनंमुदा शिव० ३९ शिवनाम्नाविनिंदाच अविमुक्तविनिंदाचज्ञानवाप्यादिनिंदनं शिव० ४० शिवोत्तमांगजातायाः

शिवरहस्य गंगायाश्चविनिंदनं शिव० ४१ निर्माल्यफलपुष्पांबुसोमसूत्रस्यलंघनं शिव० ४२ शिवनिंदाश्रवोनित्यंहर्षेणपरमेश्वरि शिव० ४३ प्राणत्यागो
देहिनांतुदर्शनात्स्पर्शनात्तथा शिव० ४४ निंदाचशिवभक्तानांतेषांवृत्तिपरिग्रहः शिव० ४५ शिवभूम्यादिहरणेहारकाणामुपेक्षणं शिव० ४६ ग
अ० ३ वादिहरणंशंभोःतत्पयःपानमेवच शिव० ४७ वृषाश्वगजगोजाविहरणंमारणंशिवे शिव० ४८ तैलापहरणंशंभोर्गंधमाल्यादिहारणं शि० ४९
३ शिवधर्मेषुविघ्नानांकरणंमनसाशिवे शिव० ५० शिवधान्यापहरणंशिवाच्छादनहारणं शिव० ५१ शिवस्वर्णापहरणंरत्नानांहरणंमुदा शिव० ५२
शिवदास्याभिगमनंहरणंपरमेश्वरि शिव० ५३ शिववाद्यापहरणंघंटानांहरणंशिवे शिव० ५४ शिववृक्षादिहरणंस्वगृहस्यचबंधनं शिव० ५५
शिवालयेतीर्थवरेमहामार्गस्यनाशनं शिव० ५६ शिवव्रतपरोधश्चअसत्याशिवदर्शने शिवद्रोहःसविज्ञेयःप्रायश्चित्तविवर्जितः ५७ श्रीई
श्वरउवाच एवंशिवद्रोहरतात्मानोशिवेननिष्कृतिर्नापिचनिस्तरःसदा कदाचिद्देवाद्यनकल्पकोटिभिःतादृगेतिंवर्णयितुंनशेषः ५८ इ
षेसदादेविननारकोस्थितिं वक्ष्यामितेषांनतुसैरिलसके इतिश्रीशिवरहस्येईशानाख्येसप्तमांशेउत्तरार्द्धेशिवगौरीसंवादेशिवद्रोहकथनंनत
तीयोध्यायः ३ श्रीईश्वरउवाच शृणुदेविप्रवक्ष्यामिनानारत्नविचित्रिते कदाचिन्ममकैलासेशिवधर्मप्रशंसनं १ तत्कर्त्तृणांफलंदेवि
सेतिहासंवदाम्यहं सिंहासनवरासीनंचतुर्बाहुंत्रिलोचनं २ नवचंद्रकलामौलिंपंचास्यंनागभूषणं अंबिकासहितंमातुस्कंदेभाननसे
वितं ३ चामराभ्यांवीज्यमानंतरुणार्कसच्छविं सुप्रसन्नमुखांभोजंपंचब्रह्माधिदैवतं ४ भासमानंस्वांगभासाकलधौतमहागिरिं नं
दिभृंगिमहाकालचंडिनंदीशसेवितं ५ तुहुंडहुंडगणकसोमनंदिसुनंदकैः वीरभद्रमहाभद्रदिव्यकालाग्निरुद्रकैः व्योमरुद्रमहारुद्र
देवरुद्रादिसेवितं कालभैरवसुंदाग्निभैरवाद्यभिसेवितं ७ कपालखट्वांगधरमहाभैरवसेवितं नागहारमहापाशघंटामुद्गरशूलधृक् ८
चंद्रार्कशेखरैर्नभासिमस्तकैरहिमन्युभिः गणेंद्रैर्वीरणेंद्राभैर्मृगेंद्रसमविक्रमैः ९ तथान्यैर्गणवृंदेश्चनानावेषैर्दुरासदैः वानराखुमुखै
र्भीमैस्तरक्षुवृकगोमुखैः १० सर्पास्यैर्गजगोमायश्वश्वोष्ट्रमुखैःशिवे मयूरशुकमार्जारसूकरव्याघ्रवक्त्रकैः ११ मनुसिंहमुखैर्भीमैर्भोगि
भूषांगभूषणैः पिचिंडिलैरुर्ध्ववक्त्रैःकरालैर्विकटैस्तथा १२ ऊर्ध्वनासामहानासामहोष्ठैलंबकर्णकैः उन्नतैर्वामनैर्मुंडैःजटिलैःशरभास्यकैः शिवं
भस्माभ्यक्तैस्त्रिपुंड्रांकैःसर्पहारैर्विभीषणैःमुसलोलूखलधरैःशूलहेतिगदाधरैः १४ बाणबाणासनकरैःव्याघ्रेभांबरधारकैः मृगत्वचालंकृतांगैः ३

वल्लकीहल्लकीकरै १५ महाडमरुभेरीणांशंखढक्कासमस्वनैः निःसाणमर्दलकरैः कपालावलिभूषितैः १६ द्वैत्यंद्रामांपुराभ्यर्च्यतामसार्चोप्रभा
वतः प्राप्तैरेवंगणत्वंमेनित्यंप्रहसनंमम १७ विनोदहेतुः कैलासेसमतेगणपोत्तमाः नृत्यंतिप्रहसंत्यन्येवादंतेगीतकोशलैः १८ मड्डुमड्डुभमल्ल
कपटहानकगोमुखान् हल्लकींवादयंत्यन्येहल्लीसंलास्यमानतुः १९ त्वयासहाहंकैलासेतान्पश्यामिगणोत्तमान् ततःकतिपयेकालेवहलेपर
मेश्वरि २० कैलासमूलभागस्थजंबूद्वीपप्रविस्थिताः भारतेपुण्यवर्षेबैकेचिद्भक्तवरामम २१ चातुर्वर्ण्यप्रविख्याताब्रह्मक्षत्रविशस्तथा॥
शूद्रस्तथानेदेवेशिशिवधर्माणितन्वते काश्यांकाश्यामवंत्यांचअयोध्यामथुरासुच पुष्करेचकुरुक्षेत्रेप्रभासेरुद्रकोटिके २३ कालंजरेमहा
कालेकेदारेवनखंडके प्रयागेपृथुशैलेचचित्रकूटेमहेश्वरे २४ त्र्यंबकेचैवगोकर्णेश्रीशैलेपुंडरीकके श्रीकंठेचैवहालास्येरामेशेवेणुकानने
२५ शुचींद्रेपापनाशेचपुण्येचोत्तरकोशके रत्नाद्रौमातृशैलेचतृणज्योतौचजंबुके २६ घृतस्थानेचजप्येशेनंजेशेकुंभघोणके मध्यार्जुनेत्रि
कोटौचकुद्दालेचमयूरके २७ श्रीकाषेचघंटेशेचश्रीवांछेचजरायुके वल्मीकेवेदविपिनेदुर्गेशेनेजनीवने २८ सुंदरक्षीरविपिनेमंगलेकेउ
केपुरे तांम्रपर्ण्याःसह्यजायाःपिनाकिन्यास्तटद्वये २९ गोदावर्याश्चकृष्णायाःहस्तिकाटद्ययोर्द्वयोः पयोष्ण्यायाश्चतुंगायानर्मदायास्तटद्वये ३०
यमुनागंगयोस्तीरेवृषद्रुत्यास्तटद्वये अन्यासामापगानांतुतटयोःक्षेत्रजानराः ३१ शिवधर्मवितन्वंतेबहुपुण्यवशादुमे एतस्मिन्नंतरेतत्रवि
मानवरमास्थिताः ३२ नानाध्वजपताकाढ्यमुक्तादामविचित्रितैः अत्यर्कभासमानेश्चवृषध्वजविभूषितैः ३३ माहेश्वरैःगणेंद्रैश्चपूजिता
स्तेष्वधिष्ठिताः चूयमानाश्चामरौघैःवीज्यमानाश्चवीजनैः ३४ रुद्रकन्यावृताःसर्वेनाकिहस्तसुमार्चनैःवेणुवीणादिनिनदैःशंखमर्दलदुंदुभिः
३५ वाद्यमानाःसुवर्णाढ्यआनंदन्नभिताडिताःजितसप्तांबुधिरवाःचक्षुश्श्रोत्रसुखावहाः ३६ रुद्राणीनर्त्तनालोकैर्यांतितेमेरुमस्तके चंद्रार्ध
मस्तकाःसर्वेभस्मपांडरविग्रहाः ३७ त्रिनेत्रानीलकंठाश्चपश्येनान्कमलेक्षणे मत्केंकर्यरतान्भूमौक्षेत्रेष्वेतेषुशैलजे ३८ जंबूद्वीपस्थकैला
सेगच्छंत्येतेमनोरमे तवकारुण्यलोकेनतेषावासोभवेच्छिवे ३९ जंबूद्वीपस्थकैलासेभक्तानांममपार्वति मत्सारूप्यप्रपन्नानांब्रह्मक्षत्रविशांशिवे
४० स्कंदउवाच एवंकैलासशैलेगिरिवरसुतयासंवदन्नास्तईशस्तानालोक्यविमानरत्नशिखरैःरुद्रैस्तथासंगतान् भक्तांस्तान्शिवधर्मवर्य
निरतानार्यासुखांभोरुहंपश्यंस्तान्प्रश्नभारंप्रवदद्दथमुनेसेनिहासमनोज्ञा ४१ इतिश्रीशिवरहस्येदशमांशेउत्तरभागेशिवगौरीसंवादेचतुर्थोध्यायः४
श्रीपार्वत्युवाच एतेकेतवसारूप्यंप्राप्ययांतिमहेश्वर जंबुद्वीपस्थकैलासंरुद्रैःसंपूजितंवद १ ईश्वरउवाच शिवधर्मपराःसर्वेएतेभारतभूतले
नानाजात्यानरादेविमह्यमाचरणाभुवि २ तेनदक्षिणकैलासंसमायांतिसहस्रशः मत्सारूप्यधराःसर्वेपूजितागणपुंगवैः ३ भोगभाजोवसंत्यत्र

ई०द०उ०

शिवरहस्यं यावत्कल्पायुतंशिवे शिवधर्मेत्रदेवेशिभक्ताएवाधिकारिणः ४ ब्रह्मक्षत्रविशश्शूद्राः श्रमणाःसंकरास्तथा नेष्टधर्मेवदत्रायमधिकारीनिगद्यते ५ इष्ट
धर्मेप्यधिकृताब्रह्मक्षत्रविशःशिवे तत्राप्यधिकृतोवेदविद्वानाढ्योमखीभवेत् ६ ततद्वर्णाश्रमाचारःततद्वर्णेषुनान्यतः इत्थंसम्यक्प्रवृत्तानांविक
अ०५ ल्परहितंशिवे ७ कर्मतत्फलतिप्रेत्यस्वर्गमात्रफलप्रदं फलांतेपतनंभूमौविकलंकर्मनोयदि ८ पूर्त्ताधिकारिणामत्रस्वर्गमात्रफलंशिवे वर्णेष्वा
ढ्योधिकमोत्रनविद्वत्तात्रशस्यते ९ स्वर्गपातांतफलदःपूर्त्तधर्मोपिपार्वति सर्वेषामेववर्णानांभक्तिभाजामुमेत्रतु १० शिवधर्मोधिकारोत्रप्रस
४ दादेवमंबिके संसारसागराद्घोरादुत्तारकउदारकः ११ शिवधर्मोडुपःश्रेयान्नृणामपत्यप्रदायकः जंबूद्वीपस्थकैलासदाम्रमहेश्वरि १२ म
त्सारूप्यप्रदोदेविदेवानामपिदुर्लभः देवापिभारतेवर्षेप्राप्यभूतलमुत्तमं १३ समभ्यर्च्यैवमल्लिंगंशिवधर्मकराभवत् भूतलेकर्मकृत्वैवस्वर्गा
न्लिप्संतिमानवाः १४ कर्मभूमिरयंलोकःतत्रभारतमुत्तमः तत्रसर्वापगातीरक्षेत्रेषुमुनिदेवताः १५ कृत्वेष्टापूर्त्तकर्माणिस्वर्गंभुंजंतिपार्वति
शिवधर्मप्रभावेनदेवतिर्यङ्नराभुवि १६ जंबूद्वीपस्थकैलासंसमायांतिगणार्चिताः ममसारूप्यभाजोहिवसंत्ययुतकल्पकं १७ ततश्चुत्तान्नृपत्त
योभवंतिभुविभोगिनः अष्टैश्वर्ययुतादेविअष्टमूर्त्तिस्वरूपावशात् १८ तेतुवासनयाभूमौशिवधर्मेवितन्वते देहांतेभारतेवर्षेमत्सारूप्यमवाप्यच १९
जंबूद्वीपस्थकैलासेभोगभाजेवसंतिते तेषांनस्वर्गवसतिःभवेत्पातदायिनी २० देव्युवाच देवदेवमहादेवमहाकैलासवासिनः नभवंतिकथं
सर्वेदेवतिर्यङ्नराभुवः २१ महाकैलासवासायतवसामीप्यवर्जनं केनधर्मप्रभावेनभविष्यतिचतद्वद २२ सुगोप्यमपितद्ब्रूहि श्रोतुमिच्छामितत्त्वतः
नगोप्यमस्तिमयितप्रसादेनवदस्वमां २३ देव्युवाच प्रावृषश्चादुदयास्तशेखरलसन्मस्तंविशस्तानकं कंजास्यासनभस्मभोलिजमहामाणिक्य
मालाधरं कंजोद्भूतकपालजालविलसत्कंधप्रभाकंधरं कंदर्पांधकदारणंभजहरंचेतःसदाशंकरं २४ कटकूटगणेरभोष्टुतांघ्रिंकररित्व
क्पटभूषणसत्कटिंभजभूधरदारखेटदृशाविलसन्मौलिधरंहरंपरंतं २५ इतिश्रीशिवरहस्येईशानाख्येदशमांशेउत्तरार्द्धेपंचमोध्यायः ५
ईश्वरउवाच सम्यक्पृष्टंत्वयादेविरहस्यमिदमद्भुतं नचोत्तरेसुधासिंधुसागरोर्मिपरिवृत्ते १ महाकैलासमौलौतुनिवासीकोभवेत्प्रिय बहु
जन्मसहस्रेषुचरस्थावरदेहिषु २ जरायुजांडजस्वेदउद्भिज्जेषुमहेश्वरि जातानामथमर्त्यत्वंतत्रविप्रत्वमंबिके ३ सद्भावनाचविप्रत्वेमयि
भक्तिस्ततःपरा तयाभक्त्यार्चनंलिंगेअनन्यसुरतुल्यता ४ भस्मरुद्राक्षधारित्वंरुद्रपंचाक्षराश्रयः शिवक्षेत्रनिवासश्चशिवनामजपः
शिवे ५ शिवनैवेद्यभुक्तिश्चनित्यंशिवकथारतिः एतेनक्रमयोगेनभक्तानामत्रसुंदरि ६ भारतेभुविदेहांतेकैलासोदक्षिणोलभेत् नचो शिवं
त्तरकैलासवासायाधिकृतोभवेत् ७ महाकैलासमौलौतुनिवसामित्वयांबिके नचात्रचंद्रसूर्यांशुप्रवेशोनानिलस्यहि ८ कृत्तोदेवमनु ४

ध्यानांमुनीनांतपसापिवा नलभ्योयंशिवेशैलोविष्णुब्रह्मादिदुर्लभः ९ नविष्णोःतपसाशक्यःकैलासोधरणीधरः नब्रह्मणस्तुतपसाशक्योयंनग
उत्तमः १० नवज्रिसूर्यवन्हीदुवस्वश्विमरुतोविके गंधर्वयक्षरक्षांसिनागाविद्याधरादयः ११ महाकैलासवासायईशास्तेतपअर्जितुं नयागकोटिज
फलंनह्यासेतुच्छमेवहि १२ नमहादानकोट्याचनह्यासोनेवलभ्यते नकोट्यकन्यादानैश्चनह्यासोनेवलभ्यते १३ गवांकोटिप्रदानैश्चत० गजाश्वको
टिदानैश्चत० १४ भक्ष्यभोज्यादिसंयुक्तैरन्नदानैश्चकोटिशः नयागकोटिशोदेविनयमासनकोटिभिः १५ नकोटिमंत्रजाप्येनशक्योवसुमहीधरः
नवर्णाश्रमनिष्ठादिधर्मान्वृत्तिशतैरपि १६ महाकैलासमौलौतुशक्यंनेवासअद्रिजे तन्मौलौमत्प्रसादेननिवसंतिमगाङ्जाः तरवोपिसदादेवितृणव
ल्लीद्रुमाअपि १७ पार्वत्युवाच कैलासमौलिवासोयंविष्णुनाब्रह्मणापिच देवैर्महर्षिभिस्तप्तैर्नैनलब्धोमहीधरः १८ नंदिकेशादिगणैस्तवसामीप्य
वर्त्तिभिः महाकैलासमौलौतुवासोलब्धःकथंनुतैः १९ तद्वेदितुमिच्छामिवदमेकरुणार्णव ईश्वरउवाच नंदिकेशादिभिःस्तप्तंत्वयानज्ञातमी
श्वरि नविष्णुनाब्रह्मणावानदेवैर्मुनिभिस्तथा २० नंदिकेशादिभिस्तप्तंतेनवासोत्रसर्वदा त्रिकोटिरुद्राजाप्येनंनंदिकेशेनमत्परं २१ तेनलब्धंम
हादेविमल्लिंगस्यैवपूजया चंडीशेनात्रवसतिः भृंगिणाचप्रदक्षिणैः २२ पंचाक्षरीकोटिजपाद्वीरभद्रेणशैलजे दशकोटिनमस्कारैरुद्रावृत्यातुहुंड
कः २३ वर्षंद्वौमासदास्तोत्रैस्तुवन्नापमहीधरं ईश्वरउवाच एवंमेगणपुंगवागिरिवराज्ञातेरहस्यार्चनैःसंप्राप्ताधरणीधरेंद्रमथतेतेनैवतेसर्वदा
मत्सारूप्यधरावसंतिनियतंमत्प्रेमभक्त्यागणाःनान्यैर्षाविबुधाद्यगम्यविषयःकैलासएवंविधः २४ इतिश्रीशिवरहस्येईशान[illegible]षष्ठो
ध्यायः ६ श्रीदेव्युवाच विश्वाधिकमहादेवविश्वाधारजगत्पते विमानवरमास्थायपूजितागणपुंगवैः १ कएतेशिवधर्मज्ञाःख्यातिंनत्कारिणो
हरजंबूद्वीपस्थकैलासंप्रत्येकंतान्वदस्वमे २ स्कंदउवाच इत्थंदेव्यातदापृष्टोनानालोकविमानगान् शिवधर्मपरान्हतेषांतद्धर्मकारणं ३ ई
श्वरउवाच शृणुदेविप्रवक्ष्यामिअवंत्यांपंद्विजाधमः बहुयाचनकोनित्यंभार्यायाःजीर्णवस्त्रधृक् ४ अवंतीपुरमध्यस्थोनित्यमेकाहभोजनःऔ
र्ध्वदैहिककर्माणिकारयत्येषपापकृत् ५ नसंध्यावंदितानेनपर्वण्यपिपरान्नभुक् नभस्मधृक्क्षालनलेनांगेरुद्राक्षमालिका ६ नरुद्रपंचा
क्षरभाक्नकृतंलिंगपूजनं नपंचयज्ञप्रवणःप्रवीणःप्रेतयात्तने ७ आद्यंतेनगोद्वयंतेनगृहीतंचसहस्रशः नित्यंसाहसचक्रन्मूर्खोभार्ययाप्रेतभोजने ८
लोकोपहासभीत्यायंस्नातिनित्यंनदीजले सनित्यंसूतकान्नादिदेविपापवरोद्विजः ९ एवंस्थितेग्राममन्यंगतोभार्यासहायवान् सापिंड्यभोजनं
कर्तुंधनलोभेनशंकरि १० मध्येवनंप्रविष्टोसौदवभस्माकितोभवत् भस्मनोद्धूलितोतत्रदंपतीधूममोहितौ ११ दवाग्निनातौमृतौतुनीतौवैवसूतं
तिकं शिवदूतैर्मोचितौचविमानवरमास्थितौदिव्यभोगसमृद्धौचयातिकैलासमद्यमे देव्युवाच एतादृशोयंपापीयान्कथंकैलासमर्हति विचित्र

तेमहादेवचरित्रंपरमाद्भुतं १३ श्रीईश्वरउवाच अज्ञानतोप्ययमुमेदेहांतेभस्मधार्यभूत् ममारोद्धूलितांगोयंविध्मावुध्यापिवर्जितः १४
किंपुनःसप्तभिर्मंत्रैर्यःस्नातिसितभस्मना नित्यंपर्वसुवादेविकिंपुनःकायनाशने १५ तेनपुण्यप्रभावेनशिवधर्मेणभामिनी भस्मांगमात्रतोयाति
कैलासंदक्षिणंद्विजःसभार्यःपापनिर्मुक्तोयमेनापिप्रपूजितः यावत्कल्पमुषित्वासौराजाभवतिधार्मिकःपुनश्चशिवधर्माणिकृत्वाकैलासमेष्यति
तत्पार्श्वगोभ्राजतेन्योवैश्योश्यासहायवान् १८ पित्रामात्रापरित्यक्तोउज्जइन्यांवसन्नसौ पित्रावाणिज्यलाभेनधनंयत्समुपार्जितं १९ भोगार्थंवैश्य
वेश्यायैदत्वाधनमनाशयत् तेनविद्रावितपित्रामात्रावंधुजनैरपि २० भिक्षइत्वादिवान्नादिरात्रौपौरगृहेष्वयं चोरइत्वाधनंधान्यंवासोरत्नवि॰
भूषणं २१ वेश्यायैप्रददात्येवग्रामपालैरलक्षितः कदाचिद्राजभवनेअंधकारावृत्तेनिशि २२ भित्वाकोशार्गलंहैमंकटिसूत्रमपाहरत् यावद्वंतुंसमु
द्युक्तोत्तपालैरप्यनुद्रुतः २३ तंराज्ञेदर्शयामासुःकटिसूत्रकरंशिवे बध्वाकारागृहेराजावर्षमात्रमपातयत् २४ राजासंप्रार्थितोवैश्यःवैश्यपुत्रम
मूमुचत् छित्वाकर्णनासिकांचधावमानइतस्ततः २५ वैश्ययापिनिरस्तोसौनिस्वमाद्द्रवणस्तदा निर्धनोप्ययमुन्मत्तोयातिसताडितःतया २६ कदा
चिद्दैववशतोमंदवारेप्रदोषके स्ववस्यवेश्यांन्ववत्संतीमहाकालेश्वराग्रतः २७ धृतत्रिपुंड्ररुद्राक्षांपीनोन्नतपयोधरां समालिलिंगवाहुभ्यांसुहृदंग
ढहृज्जनैः २८ संताडितोमस्तकेथसवैश्योमृतिमाप्तवान् नीतोंतकपुरंदूतैःयाम्यैस्तेनार्चितोप्यसौ २९ पापमुक्तःसमायातिकैलासंदक्षिणंशिवे
देव्युवाच वेश्यासक्तःकथंवैश्योकैलासंप्राप्तवान्विभो वेश्ययात्रविमानेनतन्मेवक्तुमिहार्हसि ३० ईश्वरउवाच सवश्यवेश्याथवणिक्पतेःसुतो
ममारशंभोःसविधंप्रदोषे गाढंसमालिंगनतस्तदंगतत्फालवक्षोजगतत्रिपुंड्रं ३१ दधन्नसौफालतलेस्ववक्षःतदाजहौप्राणमथोसवैश्यःय
स्त्वन्तकालेशिवसंन्निधौमृत्तिंविभूतिपुंड्रैरपिमंडितांगः ३२ समेष्यतिज्ञानवतांवरिष्ठोप्यज्ञानतोवैश्यसुतोयथायं तेनायमभ्येतिचपापवर्जितः
कैलासमेवेहनविस्मयस्त्वया ३३ कार्यःशिवेवैश्यसुतःसवैश्यात्रिपुंड्रमहात्म्यमिदंसुपुण्यदं ३३ इतिश्रीशिवरहस्येईशानाख्येदशमांशेउत्तरार्धेभ
स्मत्रिपुंड्रधारणमहिमानामसप्तमोध्यायः ७ देव्युवाच अत्यर्कोभ्राजतेकोयंविमानोत्तममाश्रितः छादयन्मंडलंभानोर्यातिरुद्रैःपरीवृतः १
तन्मेवदामरश्रेष्ठाअर्द्धेदुकृतशेखर शिवधर्मप्रभावंतेश्रोतुंकौतूहलंमम २ ईश्वरउवाच गौडेशानर्मदातीरेक्षत्रियःसोमवर्मकःनाम्नाधनुर्धरो
यातिमृगयायैवनप्रति ३ पाशपाणिःशूनांव्यूहैःमृगान्हंतिरुरून्वृकान् बकान्छकान्कपोतांश्चमाप्रभूदारगोमृगान् ४ एवंतस्यकियान्कालो
गतोमांसानिभुंजतःकदाचिद्विपिनंयातेतस्मिन्वैसोमवर्मणि ५ धनुर्बाणकरेहस्तीनिपानार्थसमाययौ मदांधःकरिणीव्यूहैःकलभैरपिसं	
वृतः ६ विलोल्यकानर्मदांस्वैरंस्वपुष्करजलैःकरी घर्मांशुकिरणैस्तप्तःधरणीरेणुरूषितः ७ संस्पृष्टंपुष्करेणैवकरेणंकलभांस्तदा सनर्मदाजलासारैः	

स्वांगतापमनीनशत् ८ तंतादृशंकरिवरंगिरिशिरवरोपमं कर्णतालसमुद्भूतवायुनोद्धूतषट्पदं ९ रुद्राक्षवृक्षखंडस्थोजघानेकेषुणाकरिं
क्षत्रियेषुसमाधूतोपञ्चीतिर्यन्निरीक्ष्यतं १० रुद्राक्षस्त्रियंतत्रपुष्करेणधृतस्तदा पादेनाक्रम्यतद्वक्षोकरोदेहंद्विधाकरोत् ११ आगंतुस्त्रियांग
स्यरुद्राक्षद्रुममस्तके स्वपुष्करेणोर्ध्वगंतंक्षेपयामासपञ्चिराट् १२ संकेशलग्नशाखाग्रःरुद्राक्षस्यतदाशिवे रुद्राक्षबीजसंस्पर्शात्तदंगस्य।
पसङ्गति विमानमध्यगोयातिस्त्रियोयंमहेश्वरि संकरोन्योप्ययंपापीकेदारशिखराश्रयः १४ व्याधोमृगजमांसेनसंपोष्यस्वकुटुंबकं म
त्स्यान्जालेनधृत्वायंतद्विक्रीयांगपोषकः १५ जीवस्यस्तंतहिंस्रोयंमलिनोमधुमूलभाक् दाशैर्वृत्तःसदानावातारयंजनसंघकं १६ आत
रैःजीवतेनिस्सलशुनासीशुनावृत्तः कदाचिद्देषपापीयान्नावासंतारयन्जनं १७ उन्मत्तगंगास्त्रोतेननीतोनावाविभिन्नया ममारदाशैःसजनै
र्गंगांभःप्रपिबन्स्तदा १८ अन्योन्यकंठनालिंग्यतत्रतेमन्क्षिरेजनाः तन्मध्येकश्चिदास्तेन्यारुद्राक्षस्त्रगलंकृतः १९ शूद्रस्तदालिंगनतो
व्याधोयंगांगजेंभसि मग्नस्तुस्तत्रकेदारेशूद्रव्याधोमहेश्वरि २० विमानेनसमायातोरुद्राक्षस्पर्शनतोविके गंगांभस्तत्सुपानेनरुद्राक्षस्पर्शनेन
च २१ विमुक्ताघोसमायातोरुद्राक्षस्पर्शनतोविके गंगाधूतपापोमनोरमे खादन्मांसंपिबन्मद्यंसगच्छन्नत्यजामपिपातकेभ्योविमुच्येतरुद्राक्ष
स्त्रगलंकृतः किंपुनःकायपतनेदधन्रुद्राक्षमुत्तमं २३ समायान्तिचकैलासंसत्यमेवचनंप्रिये ईश्वरउवाच देहांतेविघ्नंममाक्षज
वरंपापैर्विमुक्तोभवेत्कैलासेगणपुंगवार्चितोप्यनुदिनंकल्पंतदाप्यद्विजे राजाभूमितलेभवेदथशिवेरुद्राक्षसंधारणात्कोवावेदतथा
स्यजातमहिमाअज्ञानतोप्येवमे २४ इतिश्रीशिवरहस्येईशानाख्येदशमांशेउत्तरार्द्धेरुद्राक्षमहिमानामाष्टमोध्यायः ८ श्रीईश्वरउवाच
आनर्त्तविषयेकश्चिद्ब्राह्मणोवेदपारगः ब्राह्मणान्तत्रतत्रत्यानध्यापयतिपार्वति १ वेदांश्चस्मृतिशास्त्रंचतर्कंव्याकरणंतथा मीमांसांसां
ख्ययोगौचनाटकंचप्रहेलिकां २ तस्यासन्बहवःशिष्यानानादेश्यद्विजोत्तमाः तस्यभार्यागुणवतीरूपयौवनसंयुता ३ भर्तृशुश्रूषण
रताशिष्याणांपोषणेरता कश्चित्तत्रास्तिविख्यातोशूद्रोदेविकृषीबलः ४ त्रिपुंड्ररुद्राक्षधरोबहुगुःशिवतत्परः धनधान्ययुतःशूद्रःपं
चाक्षरपरायणः ५ तत्रधर्मेश्वरागारेप्रातःसायंशिवाग्रतः पंचाक्षरंजपत्येवध्यायमानोमहेश्वरं ६ एवंनित्यंस्थितस्यास्यतस्यब्राह्मण
स्यच एककालेभवत्कालःजग्मतुस्तौयमंप्रति ७ यमेनपूजितःशूद्रोद्विजःपार्श्वेनिवेशितः तत्रांतरेशिवगणैःविमानंसर्वतोज्वलं ८
समानीतंतुशूद्रायतदारुह्यमनोजवं समायात्पयमीशानिकैलासंदक्षिणंमम ९ विभ्राजमानोवपुषारुद्रवृंदार्चितोप्ययं शूद्रःपंचा
क्षरजपाद्ब्राह्मणादत्यरिच्यते १० यममाहतदाविप्रःसुशर्मारवःकृतांजलिः सुशर्मोवाच त्वंयमोधर्मवेत्तासिशूद्रःसंपूजितःकथम्॥

ई०द०उ०

शिवरहस्य०

अ०९

६

ब्राह्मणं मां परित्यज्य पंचयज्ञपरायणं ११ त्वया संपूजितो स्यपत्रकर्मणां फलभागहं सुशर्मणो वचः श्रुत्वा यमः प्राह द्विजोत्तमं १२ यम उवाच
पंचाक्षरपरः शूद्रः कैलासं याति सत्तम पूजितो गणवृंदैश्च कल्पं तत्र वसेद्द्विज १३ स भूमौ नृपतिर्भूयात्सर्वभोगसमृद्धिमान् शिवधर्मप्रभा
वो यं त्वं तु स्मृतिपरायणः १४ स्वर्गलोकं व्रज मुने स्वर्गात्ते पतनं भवेत् पुनश्च विप्रजातीयो भूत्वा कर्मण्यथा ह्यतः १५ पुनः पुनर्व्रज मुने स्वर्गलोकं सु
खावहं एवं स्मृतिपराणां तु स्वर्गमात्रफलं द्विज १६ धर्ममेवं विजानामि नात्र कार्या विचारणा न त्वं कैलासवासाय योग्यो सि द्विजपुंगव १७ गच्छ त्वं स्व
र्गमेवाद्य शूद्रः पंचाक्षराश्रयः तस्माद्गच्छति कैलासं नैवं त्वं विस्मयो भवेत् १८ यम उवाच को वा वेद महेश्वरस्य महिमा पंचाक्षरीजापिनां सर्वाघाद्रिपविः
सदैव जपतां पंचाक्षरः पावनः त्वं गच्छाशु मुने फलप्रदमहो स्वर्गं तथा कर्मिणां इत्युक्तो थ यमेन विप्र निलकं तूष्णीं ययौ मानयन् इति श्री शिवरहस्ये
दशमांशे उत्तरभागे पंचाक्षरमहिमा नाम नवमोऽध्यायः ९ ईश्वर उवाच श्रीरुद्राध्यायमहिमा जापिनामभिषिंचतां यजुर्वेदे चतुर्थे तु कांडे पावन उत्तमः
१ शैवमंत्रमहारत्नखनिरेवायमुत्तमः सर्वपापक्षयकरः स्मृतिमात्रेण शंकरि २ महापानकपंचानां शुष्कार्द्राणां हरस्त्वतः प्रायश्चित्तं जपोऽस्यैव श्रीरु
द्रस्यैव मे विके ३ मम नाम्नां समूहोऽयं सर्वमंत्रोत्तमोत्तमः भस्मधारी जपस्यास्य अधिकारी प्रकीर्तितः ४ आमनंत्येव केवल्याजाबाला आमनंत्यपि
अथर्वणोऽप्यामनंतं श्रीरुद्रमहिमा शिवे सर्वैर्वर्णाश्रमैर्जप्यः शूद्रवर्जो महामनुः जपन्शूद्रो मनुं रुद्रं नरकान्नैति सान्वयं ६ ऊर्ध्वपुंड्रधरो नैव ज
प्यो रुद्रो महेश्वरि जपन्तु द्विजो ऽपि नरकं प्राप्नुयान्नात्र संशयः ७ शतशाखागता मंत्राः शतरुद्रा इतीरिताः एतेषां जपमात्रेण मुच्यते सर्वपातकैः
सर्वार्थदीपको मंत्रः सर्वरोगहरो मनुः ९ सर्वपापप्रशमनो जपतां सर्वसिद्धिदः ९ मम प्रसादजननो कैलासफलदो नृणां अत्रेतिहासं शृ
णु मे पापनाशनमुत्तमं १० अस्येतिहासश्रवणाद्रुद्राध्याये मतिर्भवेत् अविमुक्तपुरा कश्चित्सुधर्मा ख्यो द्विजोत्तमः ११ गंगास्नानपरो नित्यं भस्म
रुद्राक्षभूषणः रुद्राध्यायपरो नित्यं विश्वेशार्चनतत्परः १२ धनी मान्यो वदान्यश्च पंचयज्ञपरायणः लिंगार्चनपरो नित्यं विल्वपत्रैर्मनोहरैः १३ कदाचि
दैववशतः तस्य काश्यां महात्मनः माघे मासि महापुण्ये शिवरात्रिः समागता १४ तस्यां रात्र्यां स संभारैः भक्ष्यभोज्यैर्महेश्वरं विश्वेशमर्चितुं याता उप
चामृतघटैस्तदा १५ क्षीरसर्पिर्दधिक्षौद्रनालिकेराम्रफलरसैः जंबीररसतुल्यसारैश्च गंधपुष्पाक्षतैरपि १६ शर्करा विल्वपत्रैश्च कमलैरुत्पलैरपि
धूपैर्दीपैस्तथा विप्रो यातः शंकरालयं १७ तत्रालये लिंगपूजां कुर्वतां च द्विजन्मनां दीपानारोपयामास अन्नपूर्णालयेऽपि च १८ निमंत्र्य प्रथितविप्रो
द्विजानेकादशोत्तरं विश्वेश्वराभिषेकार्थं गेहे मां वरदायिनैः १९ सुधर्मणाप्यर्थिता स्ते के चिद्द्विप्रा धनाशया विश्वेश्वराग्रतो देवि जेपुस्ते शतरुद्रियं २०
चतुर्ष्वपि च यामेषु विश्वेशस्याभिषेचने सुधर्माप्यर्चयामास विश्वेश्वरमकल्मषः २१ शिवरात्र्यां सपर्याभिः षोडशैरुपचारकैः ततः प्रातः कृतस्नानो धने

शिवम०

६

गाःप्रददौमुदा २२ विप्रेभ्योरुद्रजापिभ्यःतेत्रेकोनैच्छदीश्वरि ममाधिकादद्स्वेतिदक्षिणामित्यथद्विजः २३ सुधर्मोप्राह तंविप्रंमयोद्दिष्टातुदीयते
नाधिकाप्रददाम्यद्यगच्छवातिष्ठवेतिच २४ सुधर्मणोदक्षिणांतांसल्लक्ताक्रोधाद्ययोगृहं सविप्रोप्याहसक्रोधंजाप्येनप्रीयतांशिवः २५ सएवांतेविमानेनशि
वार्पणकृत्ताज्जपात् समायातिचकैलासंधनेच्छात्यागतोद्विजः २६ द्विजार्थमविमुक्तेपिरुद्रजाप्यपराद्विजाः प्रायस्तेरुद्रपेशाचंघोरंबैधनलोभतः २७
तांदक्षिणांद्विजोन्यायप्रददौससुधर्मकः विप्रायसतदादेविप्रसादार्थममैवसः २८ क्षेत्रेष्वन्येषुवाशैवेरुद्रजाप्यंधनार्थिनः तेषांद्विजार्थजाप्या
नांकिंपुनःशूद्रसात्कृते २९ नरकान्नैवविस्तारस्तेषांशूद्रार्थजापिनां नकुर्वीतनकुर्वीतरुद्रमन्यार्थमीश्वरि ३० नग्राह्यंतद्धनंविप्रैःप्राणैःकंठ
गतैरपि वरमेवसुरापानं वरंगोमांसभक्षणं ३१ वरंतुलादानधनंनरुद्राध्यायजाप्यजं विप्राह्यसंकराद्यापिरुद्रजाप्यार्थमीश्वरि ३२ नग्राह्यंनैव
जाप्योयमन्यार्थंरुद्रउत्तमः नरुद्रार्थावगाहीयोपारीणोपिसमूढधीः ३३ रुद्राध्यायीसर्ववेदेषुनिष्ठःरुद्राध्यायीसर्वयज्ञेषनिष्ठः रुद्राध्यायीसर्वयो
गेषुनिष्ठोरुद्राध्यायीमुक्तएवेहदेवि ३४ इतिश्रीशिवरहस्येईशानाख्येदशमांशेउत्तरभागेरुद्राध्यायमहिमावर्णनंनामदशमोध्यायः १० शिवउवाच
कश्चायंवैश्यवर्योत्रतवनाम्नोचकीर्त्तनं कथंचकाराज्ञानेनतन्मेकथयशंकर २ शिवधर्मश्रवणतोविस्मयोममजायते देवउवाच मायापुरीतिवि
ख्याताबाहुदातीरसंगता नरनारीगणाकीर्णाविपणापणशोभिता ३ नटनर्त्तकवेश्यानांसंघशःपरिसंवृता ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैरपिसमन्विता
४ धनधान्यसमोपेतानानाश्रमनिषेविता मुक्तिदावसतांनृणांपुण्यामायापुरीशिवे तस्यांपुर्यांशिवस्थानंनाम्नारुद्रेश्वराभिधं तत्ररुद्रसरोनामतो
र्थमस्त्येकमुत्तमं ६ तत्तोयस्नानमात्रेणनरोरुद्रगणोभवेत् तत्तोयैःस्नपयेद्रुद्रंरुद्रमंत्रैर्महेश्वरि ७ मुक्तएकेनजन्मेनएकबिल्वार्पणेनच तत्रस्नात्वा
चपीत्वाचरुद्रंदृष्ट्वाचमानवः ८ मायापुर्यांमहादेविमाययामुच्यतेंबिके शिवज्ञानमवाप्नोतिशिवेनसहमोदते ९ तस्यांपुर्यामभूत्कश्चिद्वैश्योवेश्या
वशंकरः नाम्नाबद्धागदोनामभिषक्कर्मणिनिष्ठितः १० मूलिकातिलकंचूर्णंलेह्यंपेयंचलेपनं एवमौषधजालानिसंपाद्यस्वसुतैःसह ११ वेश्या
वीथ्यांचेटिकानांस्त्रीणांतुभगजीविनां हास्यादिस्थानगोभूत्वासमाक्रोशंस्कचिह्णिक् १२ वैश्यउवाच अपिवातांशिपर्णांशिवशंकरमहौषधं म
नोगृह्णीध्वममलाःयत्तयोवशगाहिवः १३ हेवेश्याःगृह्णतक्षिप्रंवशंकरमहौषधं भुजंगावशगावोद्यसर्वेस्वंतेददत्ययं १४ इतितद्वचसासर्वैगृणंहत्यो
षधमीश्वरि एवंवदन्मृतोवैश्यःकालेनकियतालवे १५ यमेनपूजितःपापैर्मुक्तोभ्यागाच्छिवेत्रतु शिवशंकरनाम्नोसप्रवादेनाप्यहर्निशं १६ अजानन्वै
श्यएवायंकिंपुनर्ज्ञानवादिनांगोंडारण्येपुराकश्चिद्व्याधःश्रीशैलमूर्धनि १७ धनुर्धरःपक्षिजालेनिहंतिचमृगान्बहून् जालेनमत्स्यांश्चैवभुंक्तेक्रीणाति
पापकृत् १८ पुत्रैःसहतदाव्याधःकालेनायततद्वयये पुत्राउद्दोध्यएवंहिममारोसोगिरेस्तटे १९ प्रहरहरतक्षिप्रंमधुमांसमृगादिकं हरशब्दोच्चारणेन

मृत्तिकालेमहेश्वरि २० विमुक्तपातकोमाधःयमेनापिचपूजितः यातिदक्षिणकैलासंनाममाहात्म्यमीदृशं २१ ईश्वरउवाच मृत्तिकालीनमन्नाम
स्मरणेनाघकोटयः प्रयांतिनलिकाघातघोषादिवविहंगमाः २२ कोवावेदमहेशनाममहिमासर्वाघनाशक्षमातन्नेहेसुचिरंरमेत्तचरमावश्यपाचभासा
समा कामारातिपदाब्जभक्तिगरिमावेदांतसीमाशिवेभोमानंदपदप्रदानपरमाव्योमावकाशप्रभा २३ इतिश्रीशिवरहस्येईशानाख्यदशमांशेउत्तर
भागेशिवनाममहिमावर्णनंएकादशोध्यायः ११ ईश्वरउवाच चित्रकूटेद्विजःपूर्वंसोमशर्मोद्वयःशिवे पंचयज्ञपरोनित्यंस्वाध्यायनिरतःसदा १
काशींगछन्नयोनत्रचित्रकूटेश्वरालये वर्षेणपीडितोविप्रःपाकंचक्रेशिवाग्रतः २ सोमार्द्रीपानभूतायांनिशायांसशिवाग्रतः मार्गयानेनदैवेनमासोभू
च्चापिकार्तिकः ३ सच्छिद्रवाससोतेनभोजनार्थेग्रतोज्वलं शिवाग्रतोदधन्दीपंतज्ज्वालोज्वलमंडपं ४ सुपाज्याप्लुतमन्नंचशिवाग्रेबुभुजेनिशि द्विजोयं
तेनपुण्येनमाजेनात्रागतःप्रिये ५ इयंमाधांगनावाल्यस्वैरिणीजारिणीतथा पापिष्ठादुर्भगाचैवमद्यमांससुराशना ६ स्थितेयंनर्मदातीरेवनेशून्य
शिवालये आगत्यसापपौमाध्वींकोक्कुटंपललंत्वदन् ७ स्नात्वाविवसनंसायंनर्मदायांतदांबिके रवभस्मांगकांतत्रसुरासवविमोहिता ८ ननर्तेशिव
लिंगाग्रेप्रदोषेयाममात्रके सायंकालेननिधनात्यक्तपापायमार्चिता ९ राजमानाविमानेषाराजहंसीवराजते शिवाग्रेतुप्रदोषेत्रनर्तनाध्यानतोंबिके १० किं
पुनस्तोत्रवाकेनरत्नस्यतांकरताडनैः अयोध्यायांपुराकश्चिदिंद्रवर्माथवाहुजः ११ सगरेशासतिभुवंराज्ञःसेनापतेःसुतः इंद्रवर्मायुवास्वैरंकांचिद्देशपांसु
सुंदरीं १२ संकेतोपवनेस्थाप्यभद्रेश्वरशिवालये रमनेप्रत्यहंतत्रधनंदत्वासुभूरिशः १३ राज्ञःसभायानिशिवेतस्यसेवार्थवासिनः यामत्रयंत्रियामायाः
समभूज्जनसंसदि राज्ञाविसर्जिताःसर्वेसमायातागृहंप्रति चंद्रिकायांसगंधांगःपुष्पापीडोभरेनवै १५ संकेतोपवनंप्रापभद्रेश्वरशिवालयं स्नक्चंच
दनेनपुष्पेणफलान्नैःशीतलैर्जलैः १६ सावेश्यापिचिरकालेननिद्राभंगेनमोहिता इंद्रवर्माणमासाद्यक्रुद्धामदनमोहिता १७ तदानींतच्चंदनंचपुष्पंत
च्छीतलंजलं प्रत्यूषेसाधनुर्मासेपानयुक्तेविशेषतः १८ लिंगेभद्रेश्वराख्येसापातयामासतज्जलं चंदनंलिंगमौलौतुसक्रोधापातयत्सुमं १९ प्रसादितासा
सुदतीतदानीमिंद्रवर्मणा० बुभुजेहृसरान्नंसाफलंतांबूलमुत्तमं भद्रेश्वराग्रतोदेविधनुर्मासस्यरूणोदये तेनपुण्यादिहायातलिंगेचंदनदानतः २१ त
च्छीतलांबुपुष्पाणांप्रदानेनमहेश्वरि विमानेनार्कवर्णेनवेश्याक्षत्रियनंदनौ २२ भोगार्थान्नाननतोदेविकिंपुनर्भक्तिभावतः ईश्वरउवाच एवंतवेशानिस
देवधर्मेशिवप्रसादंसुगुणंमहार्थदं दीपप्रदानुनिशिसोमवारेऊर्जेशिवाग्रेप्रदिनंत्यतांतथा २३ लिंगार्चकानांतुसुशीतलैर्जलैःस्नक्चंदनैर्वामन०
साप्यथान्यतः फलंमयोक्तंविहितंमयेवप्रसादएषःकथितोंबिकेतवस्वल्पोप्ययंत्तारयितुंभवार्णवात्पालकर्णधारःशिवधर्मएषः २५ इतिश्रीशिवरह
स्येईशानाख्येदशमांशेउत्तरभागेशिवधर्मप्रभावेद्वादशोध्यायः १२ श्रीईश्वरउवाच शृणुधान्यामपिकथांशिवधर्मप्रशंसनी अज्ञानाज्ञाददन्छंभोःया

त्यसोमङ्गणार्चितः १ कैलासंदक्षिणंदेविइष्टापूर्तांद्यलभ्यकं पार्वत्युवाच कोसावायातियानेनभास्करप्रतिमप्रभः अनेनतेकथंदत्तोगोस्तन्मेवदसुप्रभो
२ स्कंदउवाच इत्थंगिरिजयापृष्ठःतामुवाचमहामुने कैलासेगोप्रदस्याद्यअज्ञानेनशृणुतां ३ देवउवाच शृणुपद्मपलाशाक्षिशूद्रोयंकुरुजांगले सर्वेस्वहा
रिविप्राणामन्येघातस्यकाकथा ४ नित्यंसयात्रिकान्हत्वानड्वैःस्वकुटुंबकं संपोषयतिधान्यैश्चधनैर्दैवियथेच्छया ५ सकदाचिन्निशिस्वैरंतमसादिशिसं
वृत्ते जगामराजभवनंराज्ञोगांसमुपाहरत् ६ विवत्साधेनवस्तत्रतेनकालयत्ताशिवे हुंभारावोत्थितागोपाःपयुर्वत्साशयेनगाः ७ तत्रैकाजरनीमंगा
निर्मासस्नायुबंधना सगर्भाधावमानेनदेवायेतिविसर्जिता ८ तांजांगलेस्वरद्वारिप्रातर्दृष्ट्वालयेक्षकाः मासंसंपोष्यतांघासैर्यंधुःशूलवराङ्किता ९
तत्पोषणेनपुष्टांगीवत्संवृषमजीजनत् दशरात्रेगतेमह्यंतत्सिंचन्पयउत्तमं १० प्रातर्निसंप्रदोषेषुतल्लिंगासेचनादुमे यावद्रोमसंख्यातोराजाचोरो
पिपादजः ११ उभावज्ञाननोगामेददतुःकिंपुनःशिवे ममाभिषेककरणेकपिलाचान्यवर्णका १२ दत्वापितामहैस्तस्याशिवसारूप्यभाक्भवेत् ज्ञानेनपय
सासिच्यलिंगेमेमंगलावहे १३ सोदरस्तन्यपयसासनभूमोनसिंचति वनेरंभातरोर्देविफलगुच्छमथाहरत् १४ विप्रपत्रस्तुवैश्याये ददातिप्रतिवास
रं राज्ञःस्तूपवनेतत्रसोराङ्ग्रेचमहेश्वरी १५ पयोष्णीतीरजातेषुवनेषुकदलीतरोः कदाचिद्ग्रामपालेनदृष्टोसौविप्रपुत्रकः १६ गृहीतुंपुष्टस्तत्सस्यधा
वन्धावतएवसः पक्कंतुकदलीगुछंतत्रसोमेश्वरालये १७ अपात्तयद्धावमानःग्रामपालोर्विसर्जितः प्रदोषकालेदेवस्यअभिषेकंसमाचरत् १८
तेनपुण्यप्रभावेनशिवलोकंप्रयात्यसौ नालिकेरफलंशूद्रबालोघर्मांशुनापिनः १९ स्वल्पलिंगेनभिंद्यपोबालःतृषार्दितः तदंबुनाभिषिक्तंमेशूस्य
लिंगंव्यवस्थितं २० तेनपुण्यप्रभावेनशिवधर्मेणपार्वति विमानेशूद्रबालोयंकैलासंयातिपश्यवै २१ ईश्वरउवाच अज्ञानाद्धेशंकरेगोप्रदानाद्वंभादानां
द्वेचहैवाभिषेके सन्नालिकेरावसुसेकमात्राद्धालोप्ययंयातिशिवातिकंशिवे २२ इतिश्रीशिवरहस्येईशानाख्येदशमांशेउत्तरभागेशिवधर्मप्रभावो
नामत्रयोदशोध्यायः १३ ईश्वरउवाच कश्चिद्गोपस्तुकेदारवनखंडेस्थितोभवत् अजाविपालकोनित्यंमहिषीणांतथागवां १ तृणेषुपुष्कलेष्ववचा
रयन्गोपबालकैः क्षीरंदधिघृतंनित्यंविक्रीणातिसदापणे २ सतेनजीवतेगौरिदधिभांडंसमापयन्सूक्ष्मलिंगंभूमिगतंप्रास्खलत्तस्यपादयोः ३॥
दधिभांडंपतद्भिन्नंतल्लिंगस्यैवमस्तके दध्नाभिषेकेनैवेशिनस्याभूछिवासंनिधिः ४ कश्चित्संकरजातीयःवनेषुमधुशालिषुपीत्वामधुप्रलिप्तेनमे
घूच्छिष्टेनघर्षयत् ५ शून्यलिंगंवनस्थंतुरुद्रकोटौमहेश्वरि समधुस्नानकृदितिसमानीतोगणैर्मम ६ घृतंघटेनविभ्रान्तःकश्चिच्छूद्रकुलोद्भवःव
नेभुक्त्वाशिवागारेऊर्ध्वेउन्नामयद्धटं ७ कृष्णाष्टम्यांनिशिशिवेरज्जुर्मूषिकखंडिता तद्धटस्यघृताक्तस्यप्रापतल्लिंगमस्तके ८ घृताभिषेकस्तेनाभू
न्निशिपापस्ययावहः तेनतत्पापमखिलंप्रदग्धंतत्रपार्वति ९ लिंगस्यदर्शनंपुण्यंदर्शनात्स्पर्शनंवरं कृष्णाष्टम्यांनिशिशिवेघृतस्नानमघापहं १०

ई०८०उ०

शिवरहस्य० अयत्नलभ्यंतस्याभून्निशिशूद्रस्यतस्यवै कृष्णाष्टम्यांशिवागारेअज्ञानात्घृतसेचनं ११ प्रातर्दृष्ट्वावसिष्ठंचययौशूद्रोघृतग्रहः कालेननिधनंप्राप्यम
सारूप्यभागभूत् १२ इक्षुकांडंहरन्कश्चिदिक्षुयंत्रकरोवणिक् इक्षुयंत्रेणतत्सारंगृहीत्वास्वगृहेतदा १३ धावमानःस्खलत्पादःप्रापतच्छून्यलिंगके इक्षु
सारघटेलिंगेप्रापतद्दैवयोगतः १४ इक्षुसारासेचनंचतल्लिंगस्याभवच्छिवे माघ्यांपर्वणिदेवेशितस्यभाग्यवशाद्रुमे १५ तेनपुण्येनसवणिक्प्रापांतेस
अ०१३ द्मेंबिके काचिन्नारीशून्यलिंगेवनमध्येभयातुरा १६ शर्करासारभावध्यवनखंडेनदीजलैः दुर्गमेपंकिलेमार्गेशून्यलिंगेप्रपातयत् १७ पिपीलिकाभ
याद्रात्रोभूत्ताभूत्तत्रभाग्यतः तयातत्पुण्यमात्रेणविमुक्तासर्वपातकैः १८ द्योतयंतिविमानेनसमायातिमदंतिकं बालोयंखेलनासक्तःसिकताभिर्नदी
तटे १९ नर्मदायाःशर्मदायालिंगंवाणांकितंशिशुः प्राकारंगोपुरंकृत्वासर्वंससिकतामयं २० वन्यपुष्पैर्वन्यफलैस्तत्रतंस्थाप्यपूजयत् तेनाभ्येतिवि
८ मानेनवृषभध्वजशोभिना २१ अष्टेष्टकाभिर्यःकुर्याच्छिवालयमनुत्तमं गणेंद्रैरर्चितोयातिकैलासंममपार्वति २२ ईश्वरउवाच यःकुर्याच्छिवधर्ममेवम
बलेज्ञानादथाज्ञानतः संस्पृष्टोनिखिलंदहेद्हुतवहः तद्वत्तथायंवृषः भक्त्यैवप्रभवेत्तमत्यदधियांपापौघभित्केवलंकैलासप्रदएवनित्यकृतुकैःसंसे
वनीयोंबिके २३ इतिश्रीशिवरहस्येईशानाख्येदशमांशेउत्तरभागेशिवधर्मप्रभावेचतुर्दशोध्यायः १४ श्रीईश्वरउवाच शृणुदेविपुरागेचशिवलिंग
निरीक्षणात् केचिद्व्रजंतिकैलासंगणेंद्रैरभिपूजिताः १ कश्चिद्द्विजोदेवशर्मायुवानित्यमदोद्धतः स्रक्चंदनानिसंपाद्यतांबूलंधूपवर्तिकाः २ पित्रामा
त्राचकलहंकुर्वन्नित्यंसदांबिके नाधीतेशास्त्रमुक्तंचवेदांश्चस्मृतयोपिच वेश्यासक्तेनमनसानित्याध्यायरतोप्यसौ विस्मृत्यानध्यायकालेप्रदोषेष्वष्ट
मीषुच ४ चतुर्थ्यांचचतुर्दश्यांससप्तम्यांसनिशामुखे सुखेनगत्वानध्यायेघोरांरात्रावधिप्रिये ५ शूलहस्तेश्वरस्याग्रेनृत्यंतीवारसुंदरी तदानसाहृच्छ
येनशूलेश्वरविलोककः ६ एतेषुपुण्यकालेषुअनाध्यायमिषाच्छिवे पित्तरंवंचइत्वायंरिरंसद्रतुमिच्छया ७ हृच्छयाविष्टहृदयोवेश्यासंगमलालसः
अलसोध्ययनेप्राप्तविलासासक्तमानसः ८ धूपंतदर्थमानीतंसंधूप्यचविवाग्रतः नर्तनांतेसवेश्यायैफलपुष्पंददात्यसौ ९ तयासक्तःसदुर्मेधास्त
क्तवर्णाश्रमक्रियः कदाचिन्निशिकालेतुशिवोत्सवदिदृक्षया १० तस्यामासक्तहृदयोणादेदष्टभुजंगमः पितृगेहेममाणंसोयमायातिविप्रकः ११ वि
मानेस्वर्णाकारःसाकारइवमन्मथः दिव्यदेहेनभात्येषभानवच्छिवधर्मकृत् १२ प्रदोषेप्यष्टमीदिवसप्तम्यांचचतुर्दशी सोमवारेतथासायंशिवलिंगनि
रीक्षणात् १३ वेश्यासक्तेनचित्तेनशिवदृष्टिविवर्जितः अज्ञानाद्दर्शिनामेवंकिंपुनर्ज्ञानिनांप्रिये १४ तथान्योवैश्यपुत्रोयंचेटीवारीप्रियःसदा तत्रवंगे शिवम्
श्वरागारेनिशिशिवस्यशिवोत्सवे १५ सांब्राणिबहुलंगृह्यवेश्यकेशसुधूपनं करोमीतिविनिश्चित्यसनिद्रयापहृतोभवत् १६ तांबूलंनागवल्लीनांदल ८
साहस्रमुत्तमं क्रमुकानांपंचपलंत्यक्त्वागारेशिवस्यहि १७ जंबीरंपंचकंमानःतयायुक्तोययोजवान् तन्मरणगतंदृष्ट्वाशिवालयविचारकाः १८

तांवूलंविनिवेद्येशेसाम्राणिंधूपमात्ततुः जंवीरजरसेनेशंशिशुत्तुःतत्रतेर्चकाः १९ तद्भागधेयमुद्‌भूत्यापीश्ववणिजःशिवे सएवधनधान्येनवर्धमानोथभूतले२०
स्ववश्यंवेश्यावेश्यासोरमतेमदमोहितः धूपतांवूलजंवीरदानेनाज्ञानतोपिच २१ कालेननिधनंप्राप्यसमायातिविमानगः मथुरायांपुराशूद्रोमथुरेश्वरमंदिरे
२२ क्रयार्थमर्थवृध्यैवधान्यसंस्थाप्यविक्रयं करोतिपणदात्तृणांहायनेसधनेछया २३ दुर्भिक्षेचतदाप्राप्तेनैवेद्यार्थेशिवायवै अचूत्तुरत्तत्रधान्यंशिवेत्तस्य
शिवार्चकाः २४ विनिवेद्यत्तदास्तांतिशूद्रधान्यान्नमीश्वरि एवंस्थितेत्तेनष्टस्ताशूद्रेणेवंशिवार्चकाः २५ शूद्राऊचुः नदृश्यतेमानहीनंधान्यंममशिवार्चकाः
शिवालयस्थंस्वाधीनेभवत्तांप्रवदंत्तुमे २६ तेर्चकाःप्राहुरेवंमूषिकैर्भक्षितंनिशि नजानिमोत्रतेधान्यंयथेछंकुरुमात्तिरं २७ तथ्यंनदूचनंमान्यधान्यंमेने
समूषिकैः भक्षितंभिक्षुणादेविमयाप्राप्तंतदाप्रिये २८ तेनधर्मेणाशूद्रोयंधान्यदोयातिमत्पदं ईश्वरउवाच इत्थंप्रदोषेशिवलिंगलोकनात्साम्राणिजंवीरफ
लप्रदानात् धान्यप्रदानात्पादजविप्रवेश्याःक्रमेणयाताःशिवलोकमंविके २९ इतिश्रीशिवरहस्येईशानारव्येदशमांशेउत्तरभागेशिवधर्मप्रभावोनाम
पंचदशोध्यायः १५ ईश्वरउवाच विदर्भनगरेदेविउग्रेशाख्यशिवालये तौंतुवायाब्राह्मणीचरजकीवुरुडीतथा १वेश्यागेनेयंतत्रैवबाल्यवैधव्यतोमम
उन्नताउन्नतकुचाजारतःकिलसंगताः २ आजेनशिवकेकर्यंमात्तनुस्ताःश्रुणुप्रिये देवीउवाच बाल्ययौवनदृप्तांगाजारिण्योविधवाहिताः शिवधर्मकथंच
क्रुः तन्मेवदमहेश्वर ३ ईश्वरउवाच नात्तदामदमत्तांगपःपीनोन्नतपयोधराः नित्यंस्नात्वानदीतोयंबंधुशापभयादुमे ४ प्रातर्घटैर्जलंशीतंसमानीयशिवा
लये शिवागारस्थितान्वृक्षानूनारिकेलमधूककान् ५ विल्वाम्रफलमादीश्वरंभाजंबीरजंबुजान् जलैस्ताग्रीष्मकालेपिक्षालयंस्तामममालयं ६ अवर्ध
यंस्तथावृक्षान्फलपत्रसुमांकुरैः पटसाधनसामग्रींतौंतुवायीतुचातुरी ७ शिवायवस्त्रंकार्पासंकृत्वादात्तत्रपार्वति ब्राह्मणीरंगवल्यासाशिवस्याग्रे
विकालये ८ पंचवर्णकपिष्टैश्चनानावर्णानुरंजितं पद्मस्वस्तिकपुष्पाणिचकारप्रत्यहंशिवे ९ वेश्यासंसार्जनपराशिवागारोपलेपनी रजकीशिव
निर्माल्यवस्त्राणांक्षालनेप्यधात्त् १० भोजनार्थंसमायांतिस्वगृहेत्ताःस्त्रियःस्वयं एवंकैंकर्ययुक्तास्तानिशिजारेणसंगता ११ समकालमभूत्कालः
नीतास्तासोरिणांतिके विचार्यशिवधर्मंतत्पूजितास्तेनतत्रवै १२ प्रयांतितत्ताविमानेनपश्यधर्मस्यसूक्ष्मतां तत्करग्राबुसेकेनवृक्षाःपुष्टिमथाययुः
१३ तेनमल्लिंगपूजार्थंउपयोगोभवेच्छिवे यावत्तत्पत्रकुसुमफलबीजादिसंख्यया १४ तावत्कल्पायुतंभूयात्कैलासेवासइष्टदः तौंतवीवस्त्रदाना
न्मेयावत्ततंतुसंख्यया १५ शिवलोकमवाप्यैवमुक्तपापासमागता रंगवल्यादिकरणाद्ब्राह्मण्याश्चैवपार्वति १६ यावत्तत्पिष्टकणजसंख्ययावासए
वमे संमार्जनोपलेपेनयावत्तद्रजसःकणाः १७ तावत्कैलासवासाययोग्यैयंशिवधर्मतः तत्रान्यान्ययुवापापीवेश्यार्थंचंदनंपिषत् १८ श्लेष्म
रालयेकाश्यपामंथघर्षणजांशिलां श्लक्ष्णांदृष्ट्वासवेश्यार्थंस्वांगलेपनहेतवे १९ श्रीखंडखंडंसंपाद्यचंद्रकेसरकुंज्मलैः संयोज्यघर्षयत्येवतत्रदे

ई०द०उ०

शिवरहस्य.

अ०१६

१

वायसोविरः २० मद्दातिसजंवीरमात्रमुत्कृष्टचंदनं शिवार्चकास्तेग्रीष्मेवैलिंगालेपनमारभः २१ तेनपुण्यप्रभावेनसचेटोपदुरागतः कश्चिद्द्रांडी
रकपुरेम्याघ्रेश्वरशिवालये २२ बालकंस्वस्यगोवत्सपोषणार्थंनदाविके अजाविपालनार्थायनित्यंगत्वाशिवालयेत्रिणखंडनिकापाणिःशिवांगणमची
करत् शिवांगणास्तत्तापारइष्टकासंधिसंभवान् तृणानितत्रसूद्वेयंप्राकारेगोपुराग्रजान् तृणगुल्मलतावृक्षान्सोन्मूलान्पातयत्ससो २५ अजावि
वत्सपालार्थंनशिवागाररक्षणे मतिरस्याभवद्देवीरितेनायंशिवधर्मभाक् २६ समायास्यतिकैलासंपूज्यमानोगणेश्वरैः लिंगमालोकयन्धर्मेगर्भगेहे
शिवस्यतु २७ वीजयामाससस्वांगंतालवृंतेनपार्वती नद्धूनपातस्तत्राभून्ममलिंगेक्षणार्थकं २८ तेनपुण्येनविप्रोसावागतोमुक्तपातकः क
श्चिच्चामरहस्तेनवारयत्स्वांगमक्षिकाः २९ निवारणार्थंदुग्धवेशिवागारेन्तपात्मजः किंपुनर्ज्ञानतोभद्रेकर्मैवंकुर्वतांमम ३० ईश्वरउवाच एवं
स्त्रियस्ताःसुविमानमध्यगायुवापिसच्चंदनपेषणाद्रुमे अजाविपालोपिचलिंगवीजकःसच्चामरासक्तकरःसपुण्यभाक् ३१ इतिश्रीशिव
रहस्येईशानाख्येदशमांशेउत्तरभागेशिवधर्मप्रभावोनामषोडशोध्यायः १६ ईश्वरउवाच अथापरांशृणुशिवेकथांपापप्रणाशनी मालवेषुग्रा
कश्चित्माधःसाधुविनिंदितः १ मद्यमांसंचलशुनंखादन्नित्यंस्वभिर्वृतः वनेसरस्तीरेवृक्षषंडमध्यमनोरमे २ मृगपक्षिसमूहेवाभिल्लकागणसे
विते तस्मिन्वनेनिवसतिसदारःससुतैर्वृत्तः ३ जालेनपक्षिजालानिमत्स्यानिप्रवबंधवे शिवागारेतत्रशिवेनिवसन्मांसभोजनः ४ मत्स्यमांसंस
पक्वेवलिंगाग्रेभोजनंनिशि एवंभस्मीकिंतंतुःस्वकटीतटजंपटं ५ समासमारशिरसिशिवलिंगस्यतंपटं वितानदानतस्तेनमापमुक्तःशिवं
ययो ६ कश्चिच्छूद्रकुलोत्पन्नःचेटीवीरीमुरवांबुजः शल्यलिंगस्यशिरसिसपर्णछत्रमादधत् ७ ग्रीष्मेतच्छाययान्नंसवभुजेक्षुत्तृषाकुलःत
